शृङ्गिकं, क्ली, विषभेदः। इति हलायुधः॥

शृङ्गिका, स्त्री, अतिविषा इति शब्दरत्नावली॥

शृङ्गिणः, पुं, (शृङ्गे स्तः अस्येति। शृङ्ग + "ज्योत्स्नातमिस्रेति।" ५। २। ११४। इति इनच्।) मेषः। इति हेमचन्द्रः॥

शृङ्गिणी, स्त्री. (शृङ्गे स्तः अस्या इति। शृङ्ग + इनिः। ङीष्।) गौः। इत्यमरः॥ मेषशृङ्गीवृक्षः। मल्लिकावृक्षः। ज्योतिष्मतीवृक्षः। इति मेदिनी॥

शृङ्गी, [न्]पुं, (शृङ्ग + इनिः।) हस्ती। वृक्षः। पर्व्वतः। (यथा, रघुः। १२। ८०।
"रुरोध रामं शृङ्गीव टङ्कच्छिन्नमनःशिलः॥"
ऋषिविशेषः। स तु शमीकपुत्रः। अभिमन्युजः परिक्षित् अनेनाभिशप्तः।) शृङ्गयुक्ते, त्रि। इति मेदिनी॥ यथा, रामायणे।२।२५।२०।
"महिषाः शृङ्गिणोरौद्रा नते द्रुह्यन्तु पुत्रक॥")

शृङ्गी, स्त्री (शृङ्गि + वा ङीष्।) मत्स्यविशेषः। शिङ्गी इति शियल इति च भाषा। तत्पर्य्यायः। मद्गुरप्रिया २। इत्यमरः मधुश्च॥ महुरी ३। इति कलिङ्गः॥ मद्गुरसी ४ अप्रिया ५ शृङ्गिः ६। इति केचिदिति भरतः॥ अस्या गुणाः। स्वादुरसत्वम्। स्निग्धत्वम्। हृंहणत्वम्। कफकोपनत्वम्। शोथपाण्डुमरुत्पित्तनाशित्वञ्च। इति राजवल्लभः॥ अतिविषा। ऋषभौषधम्। इत्यमरः॥ कर्कटशृङ्गी। प्लक्षः। वटः। विषम्। इति राजनिर्घण्टः॥ अलङ्कारसुवर्णम्। यथा। स्त्री शृङ्गी मण्डनस्वर्णे। इति भरतधृतरत्नकोषः॥

शृङ्गीकनकं, क्ली (शृङ्गी मण्डनस्वर्णम्। तदेव कनकम्।) अलङ्कारसुवर्णम्। इत्यमरः॥ अलङ्कारस्य कुण्डलादेर्यत् सुवर्णं तत् शृङ्गीकनकमुच्यते शृङ्गी अलङ्कारः तदर्थं कनकं शृङ्गीकनकं अलङ्कारसुवर्णस्य शृङ्गीति च नाम। स्त्री शृङ्गी मण्डनस्वर्णे इति रत्नकोषः॥ शृङ्गी ह्रस्वान्ता च शृङ्गति कर्णादीन् शृङ्गिः शृगि शृगि व्रजे नाम्नीति इः निपातनात् जिः पाच्छोत्यादौति ईपि शृङ्गी। इति भरतः॥

शृणिः, स्त्री, अङ्कुशः। इत्यमरः॥ "शृणाति मर्म्मस्थानं शृणिः। शॄ स्तृ गि हिंसने कृगृज्याग्लाह्रस्वादेर्निरिति स्वादित्वात् क्निः निपातनादिह ह्रस्वः। नाम्नीति ह्रृणिर्व्वा।
"शृणिरङ्कुशवाची च कामश्च तृणवाचकः।"
इति शभेदात् तालव्यादिः। सरति मर्म्मस्थानं गच्छति सृणिर्दन्त्यादिरित्यन्ये। स्त्रियामित्यत्र द्वयोरिति पाठः। इतिमेदिनी॥ आवजमन्नमवमत्य शृणिं शितामिति माघः। स्त्रियामिति प्रायिकत्वादुक्तमिति सुकुटः।" इति भरतः॥

शृतं, त्रि, (श्रा पाके + क्तः।) "शृतं पाके।" ६। १। २७। इति शृभावः।) पक्वक्षीराज्यपयांसि। इत्यमरः॥ शृतमन्नं विवर्जयेदितिलाभक्॥ इति भरतः॥ क्वथितम्। इति शब्दचन्द्रिका रत्नमाला च॥*॥ अथ क्वाथविधिः।
"पानीयं षोड़शगुणं क्षुष्ण द्रव्यपले क्षिपेत्।
मृत्पात्रे क्वाथयेत् ग्राह्यमष्टमांशावशेषितम्॥
कर्षादौ तु पलं यावत् दद्यात् षोड़शिकं जलम्।
तज्जलं पाययेद्धीमान् कोष्णं मृद्वग्निसाधितम्।
शृतः क्वाथः कषायश्च निर्य्यूहः स निगद्यते॥"
क्वाथपानमात्रामाह।
"मात्रोत्तमा पलेन स्यात्त्रिभिरक्षैस्तु मध्यमा।
जघन्या च पलार्द्धेन स्नेहक्वाथौषधेन च॥"
तन्त्रान्तरे।
"क्वाथद्रव्यपले वारि द्विरष्टगुणमिष्यते।
चतुर्भागावशिष्टन्तु पेयं पलचतुष्टयम्॥
दीप्तानलं महाकायं पाययेत् द्वाञ्जलिं जलम्।
अन्ये त्विदं परित्यज्य प्रसृतन्तु चिकित्सकाः॥
क्वाथत्यागमनिच्छन्तस्त्वष्टभागावशेषितम्।
पारम्पर्य्योपदेशेन वृद्धवैद्याः पलद्वयम्॥"
अष्टभागावशेषितस्य चतुर्भागावशिष्टापेक्षया गुरुत्वाद्दीप्तानलं महाकायं पलद्वयं पाययेन्मध्यमाग्निमल्पकायं पलमात्रं पाययेत्। मात्रोत्तमा पलेन स्यादित्यादिवचनात्।
"क्वाथे क्षिपेत् सितामंशैश्चतुर्थाष्टमषोड़शैः।
वातपित्तकफातङ्के विपरीतं मधु स्मृतम्॥
जीरकं गुग्गुलुं क्षारं लवणञ्च शिलाजतु।
हिङ्गु त्रिकटुकञ्चैव क्वाथे शाणोन्मितं क्षिपेत्॥
क्षीरं घृतं गुड़ं तैलं मूत्रं चान्यत द्रवं तथा।
कल्कं चूर्णादिकं क्वाथे निक्षिपेत् कर्षसम्मितम्॥
तत्रोपविश्य विश्रान्तः प्रसन्नवदनेक्षणः।
औषधं हेम रजतं शङ्खाजनपरिस्थितम्॥
पिबेत् प्रसन्नहृदयः पीत्वा पात्रमधोमुखम्।
विधायाचम्य सलिलं ताम्बूलाद्युपयोजयेत्॥"
इति भावप्रकाशः॥

अन्यच्च।
"द्रव्यादापोत्थिताक्तोये वह्निना परितापितात्।
निःसृतो यो रसः पूतः स शृतः समुदाहृतः॥"
इति वैद्यकम्॥

शृध, व लृङ ङ पर्द्दे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्। क्त्वावेट्।)व, शर्त्स्यति शिशृत्सति। लृ, अशृधत्। ङ, शर्धते। उ, शर्द्धित्वा शृद्धा। पर्द्दोऽपानोत्सर्गः। शृधु प्रहसने इति चुरादिपरस्मैपदीधातुरन्यैर्न मन्यते। प्रहसनं विद्रवः। इति गोविन्दभट्टः। शर्द्धयति हृद्दं कुत्सितशब्दैर्बालः। इति रमानाथः। इति दुर्गादासः॥

शृध, उ ञ क्लेदने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-अक०-सेट्। क्त्वावेट्।) उ, शर्द्धित्वा शृद्धा। ञ शर्द्धति शर्द्धते। क्लेदनमार्द्रभावः। इति दुर्गादासः॥

शृधुः, पुं, (शृध + बाहुलकात् कुः।) बुद्धिः। गुदम्। इति विश्वः॥

शृधूः, पुं, (शृध + "कृतिशृध्योः कूः।" उणा० १। ८३। इति कूः।) कुत्सितः। अपानम्। इति संक्षिप्तसारोणादिवृत्तिः॥

शॄ, गि हिंसने। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-सक०-सेट्।) गि, शृणाति। शीर्णः शीर्णिः। इति दुर्गादासः॥

शेखरं, क्ली, लवङ्गम्। इति राजनिर्घण्टः॥ शिग्रुमूलम्। इति शब्दचन्द्रिका॥

शेखरः, पुं, (शिखि गतौ + बाहुलकात् अरप्रत्ययेन साधुः।) शिखावस्थितमाल्यम्। इत्यमरः॥ यथा,—
"शिखाविन्यस्तमालायामापीड़ः शेखरोऽपि च॥"
इति शब्दरत्नावली॥
(यथा, माघे। ११। ४६।
"नवकरनिकरेण स्पष्टबन्धूकसून-
स्तवकरचितमेते शेखरं बिभ्रतीव॥"
शिरोभूषणमात्रम्। यथा, कुमारे। ७। ३२।
"बभूव भस्मैव सिताङ्गरागः
कपालमेवामलशेखरश्रीः॥")
गीतस्य ध्रुवविशेषः। तल्लक्षणं यथा,—
"द्वादशाक्षरपादः स्यात् स चाल्पशुभकृत् प्रभोः।
हंसके च रसे वीरे गीयते शेखरो ध्रुवः॥"
इति सङ्गीतदामोदरः॥
लघुशेखरो यथा,—
"लघुर्गुरुर्भवेद्यत्र स भवेल्लघुशेखरः॥"
इति तत्रैव॥
(शृङ्गम्। यथा, कथासरित्सागरे।२८।१८८।
"ततोऽस्तगिरिशेखरं व्रजति वासरेशे शनैः
सखीं पुनरुपागमप्रणयिणीं समापृच्छ्य ताम्।
क्षणं जनितविस्मया गगनमार्गमुत्पत्य सा
जगाम वसतिं निजां प्रसवमित्र सोमप्रभा॥")

शेखरी, स्त्री, वन्दा। इति शब्दरत्नावली॥

शेपः, पुं, (शी + बाहुलकात् पः।) शेफः। इति शब्दरत्नावली॥ (यथा, वाजसनेयसंहितायाम्॥ १९। ८८।
"वस्तिर्न शेपो हरसा तरस्वी॥")

शेपालः, पुं, (शी + वालन्। बाहुलकात् वकारस्य पकारः। इत्युणादिवृत्तौ उज्ज्वलदत्तः।४।३८) शैवालः। इति शब्दरत्नावली॥

शेफः, पुं, शिश्नः। इति शब्दरत्नावली॥ (यथा, महाभारते। १०। ७। ३८।
"विकटाः काललम्बौष्ठा बृहच्छेफाण्डपिण्डकाः॥")

शेफः, [स्] क्ली, (शेते रेतःपातानन्तरमिति। शी + "वृङ्शीङ्भ्यां स्वरूपाङ्गयोः पुट् च।" उणा० ४। २००। इति असुन्। अत्र केचित् फ चेति पठन्ति इत्यतः फः।) शिश्नः। इत्यमरः॥ शुक्रपाते सति शेते पतति इति शेफः। शीङ् धातोर्नाम्नीति फसप्रत्ययः। शेफसशेपसौ शेफशेपौ शेवश्चेति पञ्च रूपाणि भवन्तीत्याचार्य्याः। इति भरतः॥ (यथा, बृहत्संहितायाम्। ६८। ८।
"ऋजुवृत्तशेफसो लघुशिरालशिश्नाश्च धनवन्तः॥")